# भयङ्करः सर्पः

लेखनम् - डॉ. मोहम्मद साजिद खान

चित्राङ्कनम् - मेघा अरुण



**कथाः कथयन्ति.....!**

कथाः जीवनेन सम्बद्धानाम् अम्लमिष्टानुभवानां जीवनयापनस्य मनोबलस्य तथा तादृशानां विषयाणां सन्दर्भे सहजतया सूचनाः प्रयच्छन्ति, यासाम् अभिज्ञानं बोधश्च अत्यन्तमावश्यकं वर्तते। अङ्ककीयं जगत्,नारीणां विषये विमर्शः, अथवा प्रकृतेः संरक्षणं भवतु, अथवा आजीविकायाः साधनानि, जीवनस्य आह्वानानां प्रत्यक्षीकरणं समाधानं मतदानस्य अधिकारो वा भवतु – एते सर्वेऽपि विषयाः उत्कृष्टतया जीवनयापने सहायतां कुर्वन्ति। 'महत्त्वपूर्णानां जीवनकौशलानां' विभिन्नान् विषयान् उद्दिश्य लिखितानां कथानां पठनानन्देन सहैव अवबोधात्मकस्य, तार्किकस्य, विश्लेषणात्मकस्य तथा च उचित-निर्णयस्य कौशलद्वाराणि अपि उद्घाटयन्ति। पठ्यताम्, अवगम्यताम्, अभिवर्ध्यताम्!

**कार्यक्रम-समन्वयिका:** प्रो. उषा शर्मा, आचार्या एवं प्रभारिणी, राष्ट्रीय-साक्षरता-केन्द्र-प्रकोष्ठः, रा.शै.अ.प्र.प. नवदेहली

**लेखनम्:** डॉ. मोहम्मद साजिद खान

**अनुवाद**ःडॉ. मनमोहन शर्मा

**चित्राङ्कनम्:** मेघा अरुण

**मुद्रणकला:** डॉ. ऋषिका शर्मा, सहायकाचार्यः, एनीमेशन एवं मल्टीमीडिया विभागः, बीआईटी, जयपुरम्

**प्रारूप-निर्माणम्:** मोहम्मद नाज़िम

**समीक्षा-समितिः, संस्कृतसंवर्धनप्रतिष्ठानम्, नवदेहली:** लक्ष्मीनरसिंहन् कार्याधिकारी; प्रदीप पौडेल, वरिष्ठशोधाध्येता; विष्णु प्रसाद उपाध्याय, वरिष्ठशोधाध्येता; गानमूर्ति, वरिष्ठशोधाध्येता

**मार्गदर्शनम्:** प्रो. नीना सबनानी, एनिमेटर एवं सहायक-संकायः, डिज़ाइन-विभागः, भारतीय-प्रौद्योगिकी-संस्थानम्, हैदराबादम्**;** चमूकृष्णशास्त्री, अध्यक्षः, भारतीयभाषासमितिः, नवदेहली**;** प्रो. चाँदकिरण सलूजा, निदेशकः, संस्कृतसंवर्धनप्रतिष्ठानम्, नवदेहली

**कृतज्ञता-ज्ञापनम्**

अक्षय कुमार दीक्षित, मेंटर, शिक्षा-निदेशालयः, प्रशासनम्, देहली

श्याम सिंह सुशील, लेखकः

**आईआईटी हैदराबादम्:** डॉ. प्रसाद एस. ओंकार, विभाग-प्रमुखः एवं उपाचार्यः, डिज़ाइन विभागः; प्रो. दीपक जॉन मैथ्यू, आचार्यः, डिज़ाइन-विभागः; डेलविन जूड रेमेडियोज़, सहायकाचार्यः, डिज़ाइन-विभागः; अंकिता रॉय, सहायकाचार्या, डिज़ाइन-विभागः; डॉ. मोहम्मद शाहिद, सहायकाचार्यः, डिज़ाइन-विभागः; डॉ. सौरव देवरी, सहायकाचार्यः, डिज़ाइन-विभागः; डॉ. शुहिता भट्टाचार्जी, सहायकाचार्या, उदार-कला-विभागः

गौतम गोस्वामी, सहायकाचार्यः, एनीमेशन एवं मल्टीमीडिया विभागः, बीआईटी, जयपुरम्

मोहम्मद शाह आलम, वरिष्ठः परामर्शदाता (आईसीटी), राष्ट्रीय-साक्षरता-केन्द्र-प्रकोष्ठः, एनसीईआरटी, नवदेहली

भावना खेड़ा, जेपीएफ, राष्ट्रीय-साक्षरता-केन्द्र-प्रकोष्ठः, एनसीईआरटी, नवदेहली

उल्लास
ULLAS
जन जन साक्षर
नव भारत साक्षरता कार्यक्रम

# भयङ्करः सर्पः


लेखनम् - डॉ. मोहम्मद साजिद खान

चित्राङ्कनम् - मेघा अरुण





राष्ट्रीय शैक्षिक अनुसंधान और प्रशिक्षण परिषद्
NATIONAL COUNCIL OF EDUCATIONAL RESEARCH AND TRAINING


प्रतिसायङ्कालम् इव अद्यापि फूलमती भोजनं पक्तुं करीषान्
(उपले) आनेतुं गता आसीत्।
तस्मिन् एव काले कस्यश्चित् सर्पस्य पुच्छे तस्याः पादः
निक्षिप्तः।
आत्मरक्षणार्थं सर्पः तां दष्टवान्।



किं भणसि! फूलमतीं सर्पः दष्टवान् ?
सत्यं भ्रातः! त्वरया आगम्यताम्।
हे भगवन्! पाहि ताम्।
इदं प्रार्थयन् जगेसरः गृहं प्रति धावितवान्।
जगेसरः गृहस्य द्वारे स्थितं जनसम्मर्दं विदीर्य गृहं प्रविष्टवान्।


पितृव्यः मिठ्ठुः दंशचिह्नं वस्त्रेण दृढतया बद्धवान् आसीत्। फूलमती मूर्च्छिता जायमाना आसीत्।
जगेसरः किंकर्तव्यविमूढः आसीत्।
अस्मिन् ऊहापोहे सर्वे ग्रामीणाः तां ‹गणेसी›नामकस्य तान्त्रिकस्य समीपं नीतवन्तः।



तान्त्रिकः मन्त्रपाठम् आरब्धवान्, परन्तु फूलमत्याः शरीरे स्पन्दनम् अपि न जातम्। ततश्च तान्त्रिकः बलात् क्वाथं पाययितुं प्रयत्नं कृतवान् परन्तु तस्याः दन्ताः दृढतया प्रबद्धाः आसन् इत्यतः सर्वः अपि क्वाथः बहिः अस्रवत्।








तिष्ठ!
किम् इदं कुर्वन्ति भवन्तः ?
तान्त्रिकः स्तब्धः जातः । सर्वेऽपि आश्चर्येण पृष्ठतः दृष्टवन्तः । रेखा तत्रैव स्थिता आसीत् । रेखा ग्रामप्रधानस्य पुत्री आसीत्, या नगरे अध्ययनं करोति स्म । सर्पाणाम् अन्यजीवानां च विषये तस्याः ज्ञानं सम्यक् आसीत् ।
एवं कृते सति पितृव्या न कदापि स्वस्था भवितुम् अर्हति । सा शीघ्रम् एव चिकित्सालयं नेतव्या ।
किमर्थं स्वस्था न भविष्यति ? यदि चिकित्सालये अनिष्टं किमपि भविष्यति, तर्हि कस्य उत्तरदायित्त्वं भविष्यति ?
मिट्ठू-पितृव्यस्य वार्तां श्रुत्वा तान्त्रिकः अपि वक्रदृष्ट्या रेखाम् अवलोकितवान्, परन्तु रेखा हठं कर्तुम् आरब्धवती ।
मम वचनं पालयन्तु । पितृव्यायाः समुचिता चिकित्सा तु चिकित्सालये एव भवितुम् अर्हति । इतोऽपि अधिकं विलम्बं मा कुरुत ।
कदाचित् भवन्तः सम्यक् वदन्ति। एकवारं वैद्यं दृष्ट्वा किं हानिः ?


आयान्तु, अविलम्बम् एव ग्रामान्तरस्य सामुदायिक-स्वास्थ्य-केन्द्रं प्रति नयामः इमाम्।
सामुदायिककेन्द्रं सम्प्राप्य शीघ्रमेव रेखा आपत्-काल-विभागं सूचयित्वा फूलमत्याः प्रवेशं कारितवती।
चिन्ता मास्तु, यावत् चिकित्सा भवति तावत् भवन्तः प्रतीक्षाप्रकोष्ठे उपविशन्तु ।







वैद्येन चिकित्सा आरब्धा, विष-नाशिका औषधसूचिका च प्रदत्ता।




सायंकालात् रात्रिकालपर्यन्तं सर्वेऽपि दृढ-मनसा चिकित्सालये एव स्थिताः आसन् । यतो हि अयं तेषां सर्वेषां ग्रामस्य विषयः आसीत् ।
शनैः शनैः फूलमत्याः स्थितिः स्थिरा जायमाना आसीत् एवञ्च सा चेतना-अवस्थाम् अपि प्राप्तवती स्म ।


यदि भवन्तः यथासमयम् इमां न आनेष्यन् तर्हि रोगिण्याः मृत्युः अभविष्यत्।
वस्तुतः भवन्तः सर्वेऽपि तादृशेषु स्थानेषु निवसन्ति यत्र सर्पाः अधिकाः सम्भवन्ति।
सर्पाः प्रायः उन्नत-घासेषु, विकीर्णेषु ऊर्वरकगोणीसु, शुष्कपत्रेषु, काष्ठेषु करीषेषु च भवन्ति। अतः स्वरक्षार्थं परितः स्वच्छता करणीया। इमां सूचनां भवन्तः चलदूरवाण्याम् अपि द्रष्टुं शक्नुवन्ति।


एवञ्च, यदि कदापि एतादृशी समस्या भवेत् तर्हि तान्त्रिकापेक्षया स्वास्थ्य-केन्द्रम् एव आयान्तु।

पितृव्यः मिठ्ठुः स्व-चलदूरवाणीं निष्कास्य तस्यां सर्पसम्बद्धाः सूचनाः अन्वेष्टुम् आरब्धवान्।








अधुना फूलमती पूर्वापेक्षया स्वस्था वर्तते। सा वैद्यस्य धन्यवादं कृत्वा जगेसरेण रेखया तथा च अन्यैः ग्रामीणैः सह गृहं प्रति प्रस्थितवती।

सा विद्या या विमुक्तये

**CELL FOR NATIONAL CENTRE FOR LITERACY**

**राष्ट्रीय साक्षरता केंद्र–प्रकोष्ठ**





















महत्वपूर्णजीवनकोकौसले आश्रिता

# कथा श्रृंखला










































विद्यया ऽमृतमश्नुते

एन सी ई आर टी
NCERT

राष्ट्रीय शैक्षिक अनुसंधान और प्रशिक्षण परिषद्
NATIONAL COUNCIL OF EDUCATIONAL RESEARCH AND TRAINING